न्नाथस्य रथेन २यात्रायां ३तत्र कर्त्तव्ये उत्सवभेदे च ।

**रथाङ्ग** न० अङ्ग्यते गम्यतेऽनेन अगि करणे घञ् ६त० । १चक्रे । रथाङ्गशब्दः वाचकत्वेनास्त्यस्य अच् । २चक्रवाके पुंस्त्री० अमरः स्त्रियां ङीष् ।

**रथाङ्गपाणि** पु० रथाङ्गं चक्रं सुदर्शनं पाणौ यस्य । चक्रधरे विष्णौ हला० । [वृत्ते शब्दर० ।

**रथाभ्र** पु० रथ इवाभ्रियतेऽसौ आ+भृ-मूल० क । वेतस-

**रथाभ्रपुष्प** पु० अभ्रमिव पुष्पमस्य रथनामकोऽभ्रपुष्पः कर्म० । वेतसवृक्षे भरतः । [२रथेन युद्धकारके च हेमच० ।

**रथारोहिन्** पु० रथमारोहति आ+रुह णिनि । १रथिनि

**रथिक** पु० रथो युद्धसाधनत्वेनास्त्यस्य ठन् । १रथिनि २तिनिशवृक्षे च राजनि० । इर । रथिर । इन । रथिन । इनि । रथिन् इत्यत्र । [उपाविशत्" गीता ।

**रथोपस्थ** न० रथस्य उपस्थ इव । रथमध्ये । "रथोपस्थ

**रथ्य** पुंस्त्री० रथं वहति यत् । १रथवाहके घोटके अमरः स्त्रियां ङीष् । रथस्येदं यत् । २रथसम्बन्धिनि चक्रादौ त्रि० हेमच० । द्राह्यायणः "यद्रथ्यं स्याद्वायोरिति चर्मणां प्रतिमन्त्रीयात्" "रथ्यं रथसम्बन्धि चर्मगवं लोहितपत्रादिनिर्मितम्" ताण्ड्य०ब्रा०१।७।२भा० । रथस्य तद्गमनस्य योग्या शरणिः । ३प्रशस्तपथे अभ्यन्तरमार्गे स्त्री अमरः । रथानां समूहः यत् । ४रथसमूहे च स्त्री अमरः । ५आवर्त्तन्यां स्त्री मेदि० । ६मार्गमात्रे ७चत्वरे च स्त्री हेमच० । [रदतः ।

**रद** उत्खाते भ्वा० प०सक०सेट् । रदति अरादीत् अरदीत् ।

**रद** पु० रदति उत्खनति रद-अच् ।१दन्ते । भावे बा० अप् । २उत्खनने मेदि० ।

**रदच्छद** पु० ६त० । रदान् छादयति छद-णिच्-घ ह्रस्वः । ओष्ठयोः हारा० । रदनादिच्छदादयोऽप्यत्र ।

**रदन** पु० रद-करणे ल्यु । १दन्ते अमरः । भावे ल्युट् । २विदारणे । [स्वत् उदित् वेट् रधिता रद्धा ।

**रध** हिंसने पाके च दि० पर० सक० । रध्यति ऋदित् अर-

**रन्ज** रागे (वर्णान्तराधाने) सक० आसक्तौ अक० भ्वा० उभ० अनिट् । रजति ते अराङ्क्षीत् अरङ्क्त । घटा०रञ्जयति मृगरमणे तु रजयति ।

**रन्ज** रागे आसक्तौ दिवा० उभ० सक० अनिट् । रज्यति रज्यते अराङ्क्षीत् अरङ्क्त । घटा० रञ्जयति रजयति ।

**रन्तिदेव** पु०रम-संज्ञायां क्तिच् कर्म० ।१विष्णौ मेदि०।२चन्द्रवंशे नृपभेदे ३कुक्कुरे च पुंस्त्री०शब्दर०स्त्रियां ङीष् ।

**रन्तु** पु० रम-आधारे तुन् । १वर्त्मनि २नद्याञ्च मेदि० ।

**रन्धन** न० रध-पाके ल्युट् नुमागमः । "पाके सुरद्विप ! रन्धनसमये" इत्युद्भटः । "रन्धनाय स्थाली" सि०कौ० ।

**रन्ध्र** न० रम-क्विप् ध्र-मू न० क कर्म० । १छिद्रे २दूषणे मेदि० ज्योतिषोक्ते ३लग्नतोऽष्टमस्थाने च । [वृक्षे राजनि० ।

**रन्ध्रकण्ट** पु० रन्ध्रे रन्ध्रे कण्टः कण्टकोऽस्य । जालबर्बुरक-

**रन्ध्रबभ्रु** पु० रन्ध्रे गर्त्ते बभ्रुरिव । उन्दुरौ त्रिका० ।

**रन्ध्रवंश** पु० रन्ध्रबहुलो वंशः शाक०त० । (नलतावांश) वंशभेदे । "वंशौ तिक्तौ कषायौ च किञ्चित्तिक्तौ च शीतलौ । मूत्रकृच्छ्रप्रमेहार्शःपित्तदाहास्रनाशनौ । विशेषात् रन्ध्रवंशस्तु दीपनोऽजीर्णनाशकः । कथितस्तु पाचनो हृद्यः शूलघ्नो गुल्मनाशनः" राजनि० । [रराप रेपतुः ।

**रप** व्यक्तवाक्ये भ्वा०प०सक०सेट् । रपति अरापीत् अरपीत्

**रफ** गतौ हिंसे च भ्वा०प०सक०सेट् । रफति । अरफीत्-अराफीत् । इदिदयम् । रम्फति अरम्फीत् रम्फ्यते ।

**रब** गतौ सक० प० शब्दे अक० आ० भ्वा० सेट् इदित् । रम्बति ते अरम्बीत् अरम्बिष्ट ।

**रभ** औत्सुक्ये भ्वा०आ०अक० अनिट् । रभते अरब्ध रेभे आ+आरम्भे सक० । अलिट्रञादौ आर्द्धधातुके नुम् । आरम्भः आरम्भणम् । लिटि तु आरेभे ।

**रभ** शब्दे भ्वा० आ० अक०सेट् इदित् । रम्भते अरम्भिष्ट ।

**रभस** पु० रभ-असच् । १वेगे २हर्षे मेदि० ३औत्सुक्ये ४पौर्वापर्य्याविचारे च अमरः । अर्श आद्यच् ।५वेगादियुक्ते त्रि० ६कोषकारकभेदे पु० । ७महति त्रि० निघ० ।

**रम** क्रीडायां भ्वा० आ० अक० अनिट् । रमते विरमति उपरमति अरंस्त उपारंसीत् । क्त्वा वेट् । णिचि रमयति । ज्वला० ण रमः रामः ।

**रम** पु० रम-अच् । १कान्ते २अशोकवृक्षे ३कामदेवे च मेदि०

**रमठ** न०रम-अठन् । हिङ्गुनि स्वार्थे अण् । अत्रैव न०अमरः

**रमठध्वनि** पु० रमठ इतिशब्देन ध्वन्यते ध्वन-इन् । हिङ्गुनि शब्दच० ।

**रमण** पु० रमयति-रम-णिच् ल्यु । १कामदेवे २पत्यौ । "रमण ! त्वामनुयामि यद्यपि" कुमा० । ३गर्दभे पुंस्त्री० हेमच० स्त्रियां ङीष् । ४वृषणे शब्दच० ५महारिष्टे (निम)राजनि० । जम्बूद्वीपान्तर्गते ६रम्यकनाम्नि वर्षे च । रम-भावे ल्युट् । ७सुरते न० । करणे ल्युट् । ८पटोलमूले न० मेदि० । ९जघने न० हेमच० । रम्यते-ऽनया ल्युट् ङीप् । १०नार्य्याम् ११उत्तमनार्य्याम् स्त्री